**दिनाङ्क: - 09.12.2024** **सायम्  - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**मुख्यवार्ताः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतीय-जीवनबीमानिगम इत्यस्य बीमा-शक्ति-योजनायाः शुभारम्भः हरियाणायाः पानिपतजनपदे महाराणाप्रताप-औद्यानिक-विश्वविद्यालये कृतः ।

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् सम्पूर्णे विश्वे भारतं लोकतन्त्रस्य, भूक्षेत्रस्य, सांख्यिक्याः च शक्तेः प्रदर्शनं करोति ।

भारतीयजनतापार्टीतिदलेन राहुल-नार्वेकर: अद्य सर्वसहमत्या महाराष्ट्र विधानसभाध्यक्ष: चित:।

आम-आदमी-पार्टीति-दलेन आगामिने दिल्ली-विधानसभा-निर्वाचनाय विंशति प्रत्याशीनां द्वितीया सूची प्रकाशिता।

हॉकी-क्रीडायां महिलानां एशिया-चषक-स्पर्धायाः पूल-ए इत्यस्मिन् अद्य भारतीयदलं मलेशियादलम् ओमानदेशे सम्मुखीकरिष्यति ।

---

**प्रधानमन्त्री-राजस्थानम्**

प्रधानमन्त्रिणा श्रीमोदिना अद्य जयपुरे उदीयमान-राजस्थान-वैश्विक निवेश-शिखर-सम्मेलनम्" इत्यस्य उद्घाटनं कृतम् । त्रिदिवसीयसम्मेलनं सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत्संशोधनं, कार्यान्वयनं,परिवर्तनं चेत्यादिभिः मन्त्रैः सह सर्वेषु क्षेत्रेषु भारतेन कृतानि विकासकार्याणि दृश्यन्ते ।

आत्मनिर्भर-भारताभियानं वैश्विकम् अस्ति , अस्य प्रभावोऽपि वैश्विकः वर्तते ।एतदभियानमुद्दिश्य सर्वकारः समग्र-दृष्टिकोणेन सह अग्रे सरति । श्रीमोदी प्रोक्तवान् यत् विश्वस्य निवेशकाः, विशेषज्ञाश्च भारतमुद्दिश्य अत्साहिताः सन्ति ।श्रीमोदी प्रोक्तवान् यत् भारतस्य सफलता लोकतंत्रस्य, जनसांख्यिक्याः, अन्तर्जालीय-सूचनातन्त्रस्य , कार्यान्वयनस्य च शक्तौ प्रदर्शिता भवति । अस्मिन् अवसरे प्रधानमन्त्री प्रोक्तवान् यत् देशे सुदृढलोकतन्त्रम् अस्ति। युवानः देशं विकासमार्गे अग्रे नेतुं महत्वपूर्णभूमिकां निर्वहन्ति।

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् सम्पूर्णे विश्वे भारतं लोकतन्त्रस्य, भूक्षेत्रस्य, सांख्यिक्याः च शक्तेः प्रदर्शनं करोति । राजस्थाने निवेशाय आवश्यकाधारभूत-सौविध्यानाम् उल्लेखं कुर्वन् श्रीमोदी प्रोक्तवान् यत् यदि राजस्थानम् विकासस्य नवीनशिखरं स्पृशति तर्हि देशः अपि नवीनोन्नतिं प्राप्स्यति। प्राकृतिक-संसाधनानां , आधुनिक-सूचनातन्त्रस्य , समृद्धसंस्कृतेः, सक्षम-युव-शक्तेः च उल्लेखं कुर्वन् प्रधानमन्त्री अकथयत् यत् एताः सर्वाः विशेषताः निवेशाय राजस्थानं महत्वपूर्ण-राज्यत्वेन संस्थापयन्ति । प्रधानमन्त्री अकथयत् यत् देशे विदेशि-पर्यटकानां संख्या निरंतर समेधते सहैव क्षेत्रीयपर्यटने अपि निरन्तरं नवीनकीर्तिमत् संस्थाप्यते। प्रधानमन्त्री प्रोक्तवान् यत् सूक्ष्म-लघु-मध्यमोद्यमाः कस्यापि देशस्य अर्थव्यवस्थां सशक्तं कर्तुं महत्वपूर्ण-भूमिकां निर्वहन्ति। सर्वकारः अपि स्वनीतिभिः निर्णयैः च सूक्ष्म-लघु-मध्यमोद्यम-क्षेत्राणि निरन्तरं सशक्तं करोति । इतः पूर्वं कार्यक्रमं संबोधयन् मुख्यमंत्री भजनलालशर्मा प्रोक्तवान् यत् सर्वकारः आगामि पंच-वर्षेषु राज्यस्य अर्थव्यवस्थां द्विगुणीकर्तुं लक्ष्यं निर्धारितवान्। तेन आशा व्यक्तीकृता अस्ति यत् इदं शिखर-सम्मेलनं विकसितभारतस्य विकसित-राजस्थानस्य संकल्पं साकारं कर्तुं महत्वपूर्णं भविष्यति । अनन्तरं प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतीय-जीवनबीमानिगम इत्यस्य बीमा-शक्ति-योजनायाः शुभारम्भः हरियाणायाः पानिपतजनपदे महाराणाप्रताप-औद्यानिक-विश्वविद्यालये कृतः ।

-------------------------------

**विक्रममिस्री-ढाका**

भारतीयविदेशकार्यसचिवः विक्रममिस्री, ढाका-नगरे भारत-बाङ्ग्लादेशविदेश-कार्यालय-परामर्शमण्डले भारतीयप्रतिनिधिसङ्घस्य नेतृत्वं स्वस्य बाङ्ग्लादेश-प्रतिपक्षेन जसीम्-उद्दीनेन सह करोति। अद्य प्रातः एकादशवादने ढाका-नगरस्य पद्मा-स्टेट-गेस्ट-हाउस् इत्यत्र परामर्शः आरब्धः। श्रीमिस्री अद्य प्रातःसार्धाष्ट-वादने भारतीय-वायुसेनायाः विमानेन ढाका-नगरं प्राप्तवान्। सभायाः अनन्तरं, विदेशसचिवः भोजने भागग्रहणं , बाङ्ग्लादेशस्य विदेश-प्रकरणस्य परामर्शदेन मोहम्मद-तौहिद-हुसैन इत्यनेन सह शिष्ट-संवादं करिष्यति।

---------------------------------

**महाराष्ट्रं-विधानसभा**

भारतीय-जनता-पार्टीति-दलेन राहुल-नार्वेकर: अद्य सर्व-सहमत्या महाराष्ट्र-विधानसभाध्यक्ष: चित:। श्रीनार्वेकराय अस्मिन् पदे नियुक्तये मुख्यमन्त्री देवेन्द्रफडणवीस: उपमुख्यमन्त्रिणौ अजीत-पवार-एकनाथशिन्दे इत्येतौ प्रस्तावं अयच्छन्। मुख्यमन्त्री देवेन्द्र-फडणवीस: अत्रावसरे श्रीनार्वेकराय वर्धापनानि प्रदत्तवान् विश्वासं च प्रकटितवान् यत् नार्वेकर: निष्पक्षतया सदनस्य कार्याचरणं संचालयन् सदनस्य परम्परां स्थापयिष्यति इति। विधानसभाया: कार्याचरणमद्य अवशिष्टानां नवनिर्वाचितानां विधायकानां शपथग्रहण-वचनेन सह समारब्धम् येभ्य: अस्थायि-अध्यक्षेण कालिदास-कोलम्बकरेण शपथवचनम् आकारितम् । महाराष्ट्रस्य राज्यपाल: सी.पी.राधाकृष्णन् विधानसभाया: विधानपरिषद: च संयुक्तसत्रं सम्बोधयिष्यति तदनु उभयो: सदनयो: विभिन्ना: अध्यादेशा: प्रस्तोष्यन्ते।

---------------------------------

**पारसी-अल्पसंख्यकमन्त्रालयः**

अल्पसङ्ख्यक-कार्यमन्त्रालयः अवदत् यत् देशे पारसी उत वा ज़ोरास्ट्रियन् इत्येतेषां जनसङ्ख्यायां विगत-वर्षेषु सततं न्यूनता समायाता । राज्यसभायां एकस्य प्रश्नस्य लिखिते प्रत्युत्तरे केन्द्रीय-अल्पसङ्ख्यक-कार्यमन्त्री किरेन-रिजिजुः अवदत् यत् एक-चत्वारिंशदधिक-नवदश-शततमे वर्षे देशे एक-दशमलव एकं चत्वारि लक्षतः अधिकाः पारसीधर्मजनाः आसन् यानि एकादशाधिक-द्वि-सहस्र-तम-वर्षस्य जनगणनानुसारं सप्त पंचाशत्सहस्रं यावत् न्यूनाः जाताः । केन्द्रीयमंत्री अवदत् यत् राष्ट्रिय-अल्पसङ्ख्यक-आयोग-अधिनियमस्य अन्तर्गतं अधिसूचितानां एतेषां अल्पसङ्ख्यकानां समूहानां जनसंख्यायाः अल्पतां निवारयितुं केन्द्रेण

अनेके उपक्रमाः कृताः सन्ति। सः अवदत् यत् जियो-पारसी-योजना आरब्धा यया सर्वकारः चिकित्सा-स्वास्थ्य-घटकानाम् अन्तर्गतं वित्तीय-साहाय्यं प्रददाति। चिकित्सा-घटकस्य अन्तर्गतं सर्वकारः वन्ध्यता-चिकित्सायै साहाय्यं प्रददाति।

------------------------------

## आपदलासनम्

आम-आदमी-पार्टीति-दलेन आगामिने दिल्ली-विधानसभा-निर्वाचनाय विंशति-प्रत्याशीनां द्वितीया सूची प्रकाशिता। अनेन दलेन पूर्व-मुख्यमन्त्रिणे मनीषसिसोदिया इत्यस्मै जङ्गपुराक्षेत्रं, अवधओझा इत्यस्मै पटपड़गंज क्षेत्रं, राखी-बिडला इत्यस्मै मादीपुरक्षेत्रं, प्रवीणकुमाराय जनकपुरीक्षेत्रं, सुरेन्द्रपालसिंहाय तिमारपुर विधानसभाक्षेत्रं, च आवण्टितम्। गतमासे आपदलेन दिल्लीविधानसभा-निर्वाचनाय एकादश-प्रत्याशीनां स्वीया प्रथमा सूची निस्सारिता।

------------------------------

## दक्षिणकोरिया- यून् सुक् योल्

दक्षिणकोरिया-देशस्य अधिकारिणः गतमङ्गलवासरे अल्पकालिकस्य मार्शल्-लॉ इत्यस्य घोषणायाः विषयान्वेषणे वर्तमान-राष्ट्रपतेः यून् सुक् योल् इत्यस्य उपरि यात्रा-प्रतिबन्धम् आरोपितवन्तः।

------------------------------

## झारखण्डविधानसभा

झारखण्डविधानसभायाः चतुर्दिवसीयस्य विशेष-सम्मेलनस्य आरम्भः राञ्ची-नगरे नवनिर्वाचित-सदस्यानां सभायां स्वागतेन सह जातः । मुख्यमन्त्री हेमन्तसोरेनः सर्वैः अशीति-विधायकैः सह शपथवचनं स्वीकृतवान्। कार्यवाहक-सभाध्यक्षः स्टीफन्-मारण्डी इत्येषः नवनिर्वाचितेभ्यः सदस्येभ्यः शपथवचनं प्रदत्तवान्। अध्यक्षस्य निर्वाचनं श्वो भविष्यति, तदनन्तरं हेमन्त-सोरेन्-सर्वकारस्य कृते विश्वासमतं भविष्यति। ततः परं राज्यपालः सन्तोषकुमार-गङ्गवारः विधानसभां सम्बोधयिष्यति। राज्यपालस्य अभिभाषणानन्तरं वर्तमानस्य वित्तवर्षस्य द्वितीयं अनुपूरक-आयव्ययिकं विधानसभायां प्रस्तोष्यते।

---------------------------------

**हॉकी-क्रीडा**

हॉकी-क्रीडायां महिलानां एशिया-चषक-स्पर्धायाः पूल-ए इत्यस्मिन् अद्य भारतीयदलं मलेशियादलम् ओमानदेशे सम्मुखीकरिष्यति ।

**।।इति वार्ता:।।**